। हे whatsapp तुभ्यं नमः ।

अन्तर्जालेन गमनागमनं तव

संभ्रान्त-सादर-चलभाषे भव

सूक्ष्मेन शीघ्रेण वार्तां नीत्वा

सत्वरं प्रियासमीपं याहि मम ।

हे whatsapp तुभ्यं नमः ।१

चलच्चित्रे साक्षात्कारकर्तुं

संयोगोऽस्तु प्रेमालापैः सदा

प्रियदर्शनं सुन्दरं त्वया सखे

त्वं परमानन्ददायकः शिवदो मम

हे whatsapp तुभ्यं नमः ।२

कर्णौ मधुराणि वचनानि श्रुत्वा

ओष्ठौ शीतौ विमुग्धे चक्षुषी

विरलं महिमानं गायामि तरां

त्वमेव मधुरं सकलमीप्सितं मम

हे whatsapp तुभ्यं नमः ।३

चित्राणि सन्देशांश्च प्रेषयामि

लप्स्यामि बहुशिक्षणीयविषयान्

तर्क-वितर्क-समालोचन-सभासु

प्रवेशद्वारोऽसि चिरशरणो मम

हे whatsapp तुभ्यं नमः ।४

प्रिय-संयोग-शीतल-तरलितकरः

सुख-मज्जन-सज्जन-विलोलितकरः

यदा गच्छसि वाञ्छामि प्रेमधाम

भूयाः भूतये भूतये भुवि मम

हे whatsapp तुभ्यं नमः ।५

@नन्दप्रदीप्तकुमार